# dashAvatArastotram 4

# દશાવતારસ્તોત્રમ્ ૪

## Document Information

Text title : dashAvatArastotram 4

File name : dashAvatArastotram4.itx

Category : vishhnu, dashAvatAra, vishnu, vedAnta-deshika

Location : doc_vishhnu

Transliterated by : TR Chari

Proofread by : TR Chari, NA

Description-comments : Brihatstotraratnavali 1 p. 136

Latest update : March 19, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 15, 2024

*sanskritdocuments.org*

# દશાવતારસ્તોત્રમ્ ૪

શ્રીમતે નિગમાન્તમહાદેશિકાય નમઃ ।
શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

દેવો નઃ શુભમાતનોતુ દશધા નિર્વર્તયન્ ભૂમિકાં
રઙ્ગે ધામનિ લબ્ધનિર્ભરરસૈરધ્યક્ષિતો ભાવુકૈઃ ।
યદ્ભાવેષુ પૃથગ્વિધેષ્વનુગુણાન્ ભાવાન્ સ્વયં બિભ્રતી
યદ્ધર્મૈરિહ ધર્મિણી વિહરતે નાનાકૃતિર્નાયિકા ॥ ૧॥

નિર્મગ્નશ્રુતિજાલમાર્ગણદશાદત્તક્ષણૈર્વીક્ષણૈ-
રન્તસ્તન્વદિવારવિન્દમહનાન્યૌદન્વતીસ્તા અપઃ ।
નિષ્પ્રત્યૂહતરઙ્ગરિઙ્ગણમિથઃ પ્રત્યૂઢપાથશ્છટા-
ડોલારોહસદોહલં ભગવતો માત્સ્યં વપુઃ પાતુ નઃ ॥ ૨॥

અવ્યાસુર્ભુવનત્રયીમનિભૃતં કણ્ડૂયનૈરદ્રિણા
નિદ્રાણસ્ય પરસ્ય કૂર્મવપુષો નિશ્વાસવાતોર્મયઃ ।
યદ્વિક્ષેપણસંસ્કૃતોદધિપયઃ પ્રેઙ્ખોલપર્યઙ્કિકા-
નિત્યારોહણનિર્વૃતો વિહરતે દેવઃ સહૈવ શ્રિયા ॥ ૩॥

ગોપાયેદનિશં જગન્તિ કુહનાપોત્રી પવિત્રીકૃત-
બ્રહ્માણ્ડઃ પ્રલયોર્મિઘોષગુરુભિર્ઘોણારવૈર્ઘુર્ઘુરૈઃ ।
યદ્દંષ્ટ્રાઙ્કુરકોટિગાઢઘટનાનિષ્કમ્પનિત્યસ્થિતિ-
ર્બ્રહ્મસ્તમ્બમસૌદસૌ ભગવતી મુસ્તેવ વિશ્વમ્ભરા ॥ ૪॥

પ્રત્યાદિષ્ટપુરાતનપ્રહરણગ્રામઃ ક્ષણં પાણિજૈ-
રવ્યાત્ત્રીણિ જગન્ત્યકુણ્ઠમહિમા વૈકુણ્ઠકણ્ઠીરવઃ ।
યત્પ્રાદુર્ભવનાદવન્ધ્યજઠરાયાદૃચ્છિકાદ્વેધસાં
યા કાચિત્સહસા મહાસુરગૃહસ્થૂણાપિતામહ્યભૂત્ ॥ ૫ ॥

વ્રીડાવિદ્ધવદાન્યદાનવયશોનાસીરઘાટીભટ-
    સ્ત્રૈયક્ષં મુકુટં પુનન્નવતુ નસ્ત્રૈવિક્રમો વિક્રમઃ ।
યત્પ્રસ્તાવસમુચ્છ્રિતધ્વજવટીવૃત્તાન્તસિદ્ધાન્તિભિ-
    સ્સ્રોતોભિઃ સુરસિન્ધુરષ્ટસુદિશાસૌઈષુ દોધૂયતે ॥ ૬ ॥

ક્રોધાગ્નિં જમદગ્નિપીડનભવં સન્તર્પયિષ્યન્ ક્રમાદ્-
    અક્ષત્રામિહ સન્તતક્ષય ઇમાં ત્રિસ્સપ્તકૃત્વઃ ક્ષિતિમ્ ।
દત્વા કર્મણિ દક્ષિણાં ક્વચન તામાસ્કન્ધ સિન્ધું વસન્-
    નબ્રહ્મણ્યમપાકરોતુ ભગવાનાબ્રહ્મકીટં મુનિઃ ॥ ૭ ॥

પારાવારપયોવિશોષણકલાપારીણકાલાનલ-
    જ્વાલાજાલવિહારહારિવિશિખવ્યાપારઘોરક્રમઃ ।
સર્વાવસ્થસકૃત્પ્રપન્નજનતાસંરક્ષણૈકવ્રતી
    ધર્મો વિગ્રહવાનધર્મવિરતિં ધન્વી સધન્વીતુ નઃ ॥ ૮ ॥

ફક્કત્કૌરવપટ્ટણપ્રભૃતયઃ પ્રાસ્તપ્રલમ્બાદય-
    સ્તાલાङ્કાસ્યતથાવિધા વિહૃતયસ્તન્વન્તુ ભદ્રાણિ નઃ ।
ક્ષીરં શર્કરયેવ યાભિરપૃથગ્ભૂતાઃ પ્રભૂતૈર્ગુણૈ-
    રાકૌમારકમસ્વદન્તજગતે કૃષ્ણસ્ય તાઃ કેલયઃ ॥ ૯ ॥

નાથાયૈવ નમઃ પદં ભવતુ નશ્ચિત્રૈશ્ચરિત્રક્રમૈ-
    ર્ભૂયોભિર્ભુવનાન્યમૂનિકુહનાગોપાય ગોપાયતે ।
કાલિન્દીરસિકાયકાલિયફણિસ્ફારસ્ફટાવાટિકા-
    રઙ્ગોત્સઙ્ગવિશઙ્કચક્રમધુરાપર્યાય ચર્યાયતે ॥ ૧૦ ॥

ભાવિન્યા દશયાભવન્નિહ ભવધ્વંસાય નઃ કલ્પતાં
    કલ્કી વિષ્ણુયશસ્સુતઃ કલિકથાકાલુષ્યકૂલઙ્કુષઃ ।
નિઃશેષક્ષતકણ્ટકે ક્ષિતિતલે ધારાજલૌઘે ધ્રુવં
    ધર્મં કાર્તયુગં પ્રરોહયતિ યન્નિસ્ત્રિંશધારાધરઃ ॥ ૧૧ ॥

ઇચ્છામીન વિહારકચ્છપ મહાપોત્રિન્ યદૃચ્છાહરે
    રક્ષાવામન રોષરામ કરુણાકાકુત્સ્થ હેલાહલિન્ ।
ક્રીડાવલ્લવ કલ્કવાહન દશાકલ્કિન્નિતિ પ્રત્યહં
    જલ્પન્તઃ પુરુષાઃ પુનન્તુ ભુવનં પુણ્યૌઘપણ્યાપણાઃ ॥

વિદ્યોદન્વતિ વેઙ્કટેશ્વરકવૌ જાતં જગન્મઙ્ગલં
    દેવેશસ્યદશાવતારવિષયં સ્તોત્રં વિવક્ષેત યઃ ।

વક્ત્રં તસ્ય સરસ્વતી બહુમુખી ભક્તિઃ પરા માનસે
  શુદ્ધિઃ કાપિ તનૌ દિશાસુ દશસુ ખ્યાતિઃ શુભા જૃમ્ભતે ॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

ઇતિ વેદાન્તદેશિકકૃતં દશાવતારસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by trchari, NA

---

*dashAvatArastotram 4*

pdf was typeset on March 15, 2024

Please send corrections to *sanskrit@cheerful.com*